# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गापदुद्धारस्तोत्रम्

नमस्ते शरण्ये शिवे सानुकम्पे,
नमस्ते जगद्व्यापिके विश्वरूपे ।
नमस्ते जगद्वन्द्यपादारविन्दे,
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥1॥

नमस्ते जगच्चिन्त्यमानस्वरूपे,
नमस्ते महायोगिनि ज्ञानरूपे ।
नमस्ते नमस्ते सदानन्दरूपे,
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ 2॥

अनाथस्य दीनस्य तृष्णातुरस्य,
भयार्तस्य भीतस्य बद्धस्य जन्तोः ।
त्वमेका गतिर्देवि निस्तारकर्त्री,
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ 3॥

अरण्ये रणे दारुणे शुत्रुमध्ये-
ऽनले सागरे प्रान्तरे राजगेहे।
त्वमेका गतिर्देवि निस्तारनौका,

नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ 4॥

अपारे महादुस्तरेऽत्यन्तघोरे,
विपत्सागरे मज्जतां(न्) देहभाजाम् ।
त्वमेका गतिर्देवि निस्तारहेतुर्-
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ 5॥

नमश्चण्डिके चण्डदुर्दण्डलीला-
समुत्खण्डिताखण्डिताशेषशत्रो।
त्वमेका गतिर्देवि निस्तारबीजं(न्),
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥6॥

त्वमेवाघभावाधृता सत्यवादीर्-
न जाता  जितक्रोधनात् क्रोधनिष्ठा ।
इडा पिङ्गला त्वं(म्) सुषुम्ना च नाडी,
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ 7॥

नमो देवि दुर्गे शिवे भीमनादे,
सरस्वत्यरुन्धत्यमोघस्वरूपे ।
विभूतिः(श्) शची कालरात्रिः(स्) सती त्वं(न्),
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥ 8॥

शरणमसि सुराणां(म्) सिद्धविद्याधराणां(म्),
मुनिमनुजपशूनां(न्) दस्युभिस्त्रासितानाम् ।

नृपतिगृहगतानां(वँ) व्याधिभिः(फ्) पीडितानां(न्),
त्वमसि शरणमेका देवि दुर्गे प्रसीद ॥ 9॥

इदं(म्) स्तोत्रं(म्) मया प्रोक्त-मापदुद्धारहेतुकम् ।
त्रिसन्ध्यमेकसन्ध्यं(वँ) वा, पठनाद् घोरसङ्कटात् ॥ 10॥

मुच्यते नात्र सन्देहो,भुवि स्वर्गे रसातले ।
सर्वं(वँ) वा श्लोकमेकं(वँ) वा, यः(फ्) पठेद्भक्तिमान् सदा ॥ 11॥

स सर्वं(न्) दुष्कृतं(न्) त्यक्त्वा, प्राप्नोति परमं(म्) पदम् ।
पठनादस्य देवेशि, किं(न्) न सिद्ध्यति भूतले ॥ 12॥

स्तवराजमिदं(न्) देवि, सङ्क्षेपात्कथितं(म्) मया ॥ 13॥

इति श्रीसिद्धेश्वरीतन्त्रे उमामहेश्वरसं(वँ)वादे श्रीदुर्गापदुद्धारस्तोत्रम् संपूर्णम्।।

